**शक्रः-** (आत्मगतम्) किं नु खलु मया वक्तव्यं, यदि दीर्घायुर्भवेति वक्ष्ये दीर्घायुर्भविष्यति। यदि न वक्ष्ये मूढ़ इति मां परिभवति। तस्मादुभयं परिहृत्य किं नु खलु वक्ष्यामि। भवतु दृष्टम्। (प्रकाशम्) भो कर्ण ! सूर्य इव, चन्द्र इव, हिमवान् इव, सागर इव तिष्ठतु ते यशः।

**कर्णः-** भगवन् ! किं न वक्तव्यं दीर्घायुर्भवेति। अथवा एतदेव शोभनम्। कुतः -

> **धर्मो हि यत्नैः पुरुषेण साध्यो भुजङ्गजिह्वाचपला नृपश्रियः।**
> **तस्मात्प्रजापालनमात्रबुद्ध्या हतेषु देहेषु गुणा धरन्ते॥**

भगवन्, किमिच्छसि। किमहं ददामि।

**शक्रः-** महत्तरां भिक्षां याचे।

**कर्णः-** महत्तरां भिक्षां भवते प्रदास्ये। सालङ्कारं गोसहस्रं ददामि।

**शक्रः-** गोसहस्रमिति। मुहूर्तकं क्षीरं पिबामि। नेच्छामि कर्ण ! नेच्छामि।

**कर्णः-** किं नेच्छति भवान्। इदमपि श्रूयताम्। बहुसहस्रं वाजिनां ते ददामि।

**शक्रः-** अश्वमिति। मुहूर्तकम् आरोहामि। नेच्छामि कर्ण! नेच्छामि।

**कर्णः-** किं नेच्छति भगवान्। अन्यदपि श्रूयताम्। वारणानामनेकं वृन्दमपि ते ददामि।

**शक्रः-** गजमिति। मुहूर्तकम् आरोहामि। नेच्छामि कर्ण! नेच्छामि।

**कर्णः-** किं नेच्छति भवान्। अन्यदपि श्रूयताम्, अपर्याप्तं कनकं ददामि।

**शक्रः-** गृहीत्वा गच्छामि। (किंचिद् गत्वा) नेच्छामि कर्ण! नेच्छामि।

**कर्णः-** तेन हि जित्वा पृथिवीं ददामि।

**शक्रः-** पृथिव्या किं करिष्यामि।

**कर्णः-** तेन ह्यग्निष्टोमफलं ददामि।

**शक्रः-** अग्निष्टोमफलेन किं कार्यम्।

**कर्णः-** तेन हि मच्छिरो ददामि।

**शक्रः-** अविहा अविहा।

**कर्णः-** न भेतव्यं न भेतव्यम्। प्रसीदतु भवान्। अन्यदपि श्रूयताम्।

अङ्गैः सहैव जनितं मम देहरक्षा
देवासुरैरपि न भेद्यमिदं सहस्रैः।
देयं तथापि कवचं सह कुण्डलाभ्यां
प्रीत्या मया भगवते रुचितं यदि स्यात्॥

**शक्रः-** (सहर्षम्) ददातु, ददातु।

**कर्णः-** (आत्मगतम्) एष एवास्य कामः। किं नु खल्वनेककपटबुद्धेः कृष्णस्योपायः। सोऽपि भवतु। धिगयुक्तमनुशोचितम्। नास्ति संशयः। (प्रकाशम्) गृह्यताम्।

**शल्यः-** अङ्गराज ! न दातव्यं न दातव्यम्।

**कर्णः-** शल्यराज ! अलमलं वारयितुम् । पश्य -

शिक्षा क्षयं गच्छति कालपर्ययात्
सुबद्धमूला निपतन्ति पादपाः।
जलं जलस्थानगतं च शुष्यति।
हुतं च दत्तं च तथैव तिष्ठति।

तस्मात् गृह्यताम् (निकृत्य ददाति)।

## शब्दार्थाः

| | | | | |
|---|---|---|---|---|
| निवर्त्य | - | गत्वा | - | जाकर |
| प्रीतः | - | प्रसन्नः | - | खुश |
| महत्तराम् | - | अधिकतराम् | - | और बड़ी |
| वक्ष्ये | - | कथयिष्यामि | - | कहूँगा |
| परिहृत्य | - | परिहारं कृत्वा | - | हटाकर |
| इव | - | सदृश | - | जैसा, समान |
| भुजङ्गः | - | सर्पः | - | सांप |

| | | | | |
|---|---|---|---|---|
| क्षीरम् | – | दुग्धम् | – | दूध |
| वाजिन् | – | अश्वः | – | घोड़ा |
| वारणः | – | गजः | – | हाथी |
| कनकम् | – | स्वर्णम् | – | सोना |
| असुरः | – | दैत्यः | – | राक्षस |
| कामः | – | इच्छा | – | इच्छा |
| पादपाः | – | वृक्षाः | – | पेड़ |
| निकृत्य | – | खण्डयित्वा | – | काटकर |
| मूढः | – | मूर्खः | – | मूर्ख |
| वृन्दम् | – | समूहम् | – | समूह |
| दत्तम् | – | दानम् | – | दान |

## व्याकरणम्

ABDIEL SOLUTIONS ABSOL ★PATNA★

### सन्धिविच्छेदः

| | | |
|---|---|---|
| सूर्येणैव | – | सूर्येण + एव |
| प्रीतोऽस्मि | – | प्रीतः + अस्मि |
| नमस्करोमि | – | नमः + करोमि |
| दीर्घायुर्भवेति | – | दीर्घ + आयुः + भव + इति |
| दीर्घायुर्भविष्यति | – | दीर्घ + आयुः + भविष्यति |
| तस्मादुभयम् | – | तस्मात् + उभयम् |
| एतदेव | – | एतत् + एव |
| सालङ्कारम् | – | स + अलङ्कारम् |
| नेच्छामि | – | न + इच्छामि |

नेच्छति – न + इच्छति

अन्यदपि – अन्यत् + अपि

किंचिद् – किम् + चित्

ह्यग्निष्टोमफलम् – हि + अग्निष्टोमफलम्

मच्छिरः – मत् + शिरः

सहैव – सह + एव

देवासुरैरपि – देव + असुरैः + अपि

तथापि – तथा + अपि

एवास्य – एव + अस्य

खल्वनेककपटबुद्धेः – खलु + अनेककपटबुद्धेः

कृष्णस्योपायः – कृष्णस्य + उपायः

सोऽपि – सः + अपि

धिगयुक्तम् – धिक् + अयुक्तम्

तथैव – तथा + एव

ABSOL SOLUTIONS ABSOL PATNA

## प्रकृतिप्रत्ययविभागः

उपगम्य – उप + गम् + ल्यप्

वक्तव्यम् – वच् + तव्यत्

परिहृत्य – परि + हृ + ल्यप्

निवर्त्य – नि + वृत् + णिच् + ल्यप्

गृहीत्वा – ग्रह् + क्त्वा

गत्वा – गम् + क्त्वा

जित्वा – जि + क्त्वा

| | | |
|---|---|---|
| कार्यम् | – | कृ + ण्यत् |
| भेतव्यम् | – | भी + तव्यत् |
| वारयितुम् | – | वृ + णिच् + तुमुन् |
| निकृत्य | – | नि + कृन्त् + ल्यप् |

**समासः**

| | | |
|---|---|---|
| दीर्घायुः | – | दीर्घम् आयुः यस्य सः, बहुव्रीहिः |
| अग्निष्टोमफलम् | – | अग्निष्टोमस्य (यज्ञस्य) फलम्, षष्ठी तत्पुरुषः |
| मच्छिरः | – | मम शिरः, षष्ठी तत्पुरुषः |
| गोसहस्रम् | – | गवां सहस्रम्, षष्ठी तत्पुरुषः |
| सालङ्कारम् | – | अलङ्कारेण सहितम्, सहार्थकबहुव्रीहिः |
| भुजङ्गजिह्वा | – | भुजङ्गस्य जिह्वा, षष्ठी तत्पुरुषः |
| जिह्वाचपला | – | जिह्वा इव चपला, उपमानपूर्वपद कर्मधारयः |
| देहरक्षा | – | देहस्य रक्षा, षष्ठी तत्पुरुषः |
| कालपर्ययात् | – | कालस्य पर्ययः (परिवर्तनम्) तस्मात्, षष्ठी तत्पुरुषः |
| सुबुद्धमूलाः | – | सुबुद्धं मूलं येषां ते, बहुव्रीहिः |
| जलस्थानगतम् | – | जलस्य स्थानं जलस्थानम्, षष्ठी तत्पुरुषः, तद् गतम्, द्वितीया तत्पुरुषः। |
| सहर्षम् | – | हर्षेण सहितम् (सहार्थक बहुव्रीहिः) यथा स्यात् तथा (क्रियाविशेषणम्) |
| आत्मगतम् | – | आत्मानं गतम्, द्वितीया तत्पुरुषः |
| शल्यराजः | – | शल्यानां राजा, षष्ठी तत्पुरुषः |

## अभ्यासः

### ( मौखिकः )

1. अधोलिखितानां पदानां पर्यायवाचिपदानि वदत -

मूढ़ः, वाजिन्, वारणः, क्षीरम्, भुजङ्गः, कनकम्

2. अधोलिखितानां पदानां प्रकृति-प्रत्यय-विभागं वदत -

वक्तव्यम्, उपगम्य, इच्छामि, श्रूयताम् वाजिनाम्

3. विपरीतार्थकान् शब्दान् वदत -

दीर्घायुः, प्रीतः, दत्वा, यशः, प्रविशति

4. सन्धिविच्छेदं कुरुत -

सूर्येणैव, एतदेव, प्रीतोऽस्मि, तस्मादुभयम्, नेच्छामि

## अभ्यासः

### ( लिखितः )

1. अधोलिखितानां प्रश्नानाम् उत्तराणि संस्कृतभाषया लिखत -

(क) ततः ब्राह्मणरूपेण कः प्रविशति ?

(ख) कर्णः प्रथमं किं दातुम् इच्छति स्म ?

(ग) कालपर्ययात् का क्षयं गच्छति ?

(घ) कर्णः कस्य देशस्य राजा आसीत् ?

(ङ) किं तथैव तिष्ठति ?

2. निम्नलिखितेषु वाक्येषु रेखाङ्कितपदानां स्थाने कोष्ठात् उचितरूपम् आदाय प्रश्ननिर्माणं कुरुत -

(क) ततः प्रविशति ब्राह्मणरूपेण <u>शक्रः</u>। (कः / का)

(ख) महत्तरां <u>भिक्षां</u> याचे। (किं / काम्)

(ग) मुहूर्तकं <u>क्षीरं</u> पिबामि। (कम् / किम्)

(घ) सुबद्धमूलाः <u>पादपाः</u> निपतन्ति। (कः / के)

(ङ) जलस्थानगतं <u>जलं</u> शुष्यति। (का / किम्)

3. **अधोलिखितानाम् अव्ययपदानां सहायतया रिक्तस्थानानि पूरयत -**

च, एव, अपि, यदि, इव

(क) ........................ न वक्ष्ये मूढ इति मां परिभवति ।

(ख) एष ........................ अस्य कामः ।

(ग) सूर्यः ........................ तिष्ठतु ते यशः ।

(घ) इदं देवासुरैः ........................ न भेद्यम् ।

(ङ) जलं जलस्थानगतं ........................ शुष्यति ।

4. **सन्धिः सन्धिविच्छेदं वा कुरुत -**

(क) मच्छिरो

(ख) दीर्घायुर्भवेति

(ग) हि + अग्निष्टोमफलम्

(घ) अन्यत् + अपि

(ङ) कृष्णस्योपायः

(च) सः + अपि

(छ) सहैव

(ज) धिक् + अयुक्तम् + अनुशोचितम्

5. **अधोलिखितानां पदानां प्रकृति-प्रत्यय-विभागं कुरुत–**

गृहीत्वा, दातव्यम्, वारयितुम्, जित्वा, परिहृत्य ।

6. **अधोलिखितानां पदानां स्ववाक्येषु संस्कृतभाषायां प्रयोगं कुरुत -**

कर्णः, क्षीरम्, अश्वः, करिष्यामि, इच्छसि ।

7. अधोलिखितपदेषु मूलशब्दं विभक्तिं वचनं च लिखत -

| | मूलशब्दः | - | विभक्तिः | - | वचनम् |
|---|---|---|---|---|---|
| यथा - तेन | तत् | - | तृतीया | - | एकवचनम् |

1. पृथिव्याः -
2. सुरैः -
3. कृष्णस्य -
4. देहेषु -
5. वृक्षात् -
6. पादपाः -
7. जलम् -
8. भिक्षाम् -
9. पुरुषेण -
10. धर्मः -

8. 'क' स्तम्भे प्रदत्तानां पदानां 'ख' स्तम्भे लिखितपदैः सह समुचितं मेलनं कुरुत -

| क | ख |
|---|---|
| (क) गोसहस्रम् | पादपाः |
| (ख) अश्वम् | दानवीरः |
| (ग) कर्णः | आरोहणम् |
| (घ) सुबद्धमूलाः | क्षीरम् |
| (ङ) महत्तराम् | ब्राह्मणवेशधारी |
| (च) शक्रः | भिक्षाम् |

ABDIEL SOLUTIONS ABSOL ★PATNA★

9. अधोलिखितानि रेखाङ्कितपदानि बहुवचने परिवर्तयत -

उदाहरणम् - एकवचने - <u>तस्मै</u> फलं ददाति।

बहुवचने - तेभ्यः फलं ददाति।

(क) इदम् अपि श्रूयताम्।

(ख) कनकं गृहीत्वा गच्छामि।

(ग) सः कार्यं करोति।

(घ) किं नु खलु मया वक्तव्यम्।

(ङ) इदं पुरुषस्य कार्यम्।

10. स्तम्भद्वये लिखितानां विपरीतार्थकशब्दानां मेलनं कुरुत -

| | क | ख |
|---|---|---|
| (क) | महत्तराम् | अल्पायुः |
| (ख) | प्रीतः | दाता |
| (ग) | याचकः | दुःखितः |
| (घ) | दीर्घायुः | लघुतराम् |
| (ङ) | मूढः | अपयशः |
| (च) | यशः | विद्वान् |
| (छ) | गत्वा | नास्ति |
| (ज) | अस्ति | आगत्य |

11. निम्नलिखितेषु पदेषु प्रयुक्तां विभक्तिं लिखत -

अङ्गैः, प्रीत्या, अस्य, संशयः, पृथिव्या, देहेषु, गजम्।

## योग्यताविस्तारः

'महाभारतम्' धार्मिक ऐतिहासिकश्च ग्रन्थः अस्ति। अस्मिन् ग्रन्थे भरतवंशीयानां कौरवानां पाण्डवानां च चरितं वर्णितमस्ति। ग्रन्थस्यास्य विकासस्य त्रीणि सोपानानि सन्ति -

1. 'जयः' (श्लोकसंख्या 8800)
2. 'भारतम्' (श्लोकसंख्या 24000)

3. 'महाभारतम्' (श्लोकसंख्या 100000)

**ग्रन्थेऽस्मिन् अष्टादश पर्वाणि सन्ति -**

| | | |
|---|---|---|
| 1. आदिपर्व | 2. सभापर्व | 3. वनपर्व |
| 4. विराटपर्व | 5. उद्योगपर्व | 6. भीष्मपर्व |
| 7. द्रोणपर्व | 8. कर्णपर्व | 9. शल्यपर्व |
| 10. सौप्तिकपर्व | 11. स्त्रीपर्व | 12. शान्तिपर्व |
| 13. अनुशासनपर्व | 14. आश्वमेधिकपर्व | 15. आश्रमवासिकपर्व |
| 16. मौसलपर्व | 17. महाप्रस्थानिकपर्व | 18. स्वर्गारोहणपर्व |

□